Name : ....................................................................................................

Roll No. : ................................................

कुल प्रश्नों की संख्या : 18 ]

[ कुल मुद्रित पृष्ठों की संख्या : 7

# XHY-201512

## विषय : संस्कृत

समय : 3 घण्टे ]

[ पूर्णांक : 75

*निर्देश* : (*i*) सर्वे प्रश्नाः समाधेयाः।

(*ii*) उत्तरं शुद्धं स्पष्टं च लिखत।

**प्रश्न–1** निर्देशानुसारेण शब्दरूपं लिखत— [½×4=2]

| शब्दरूपम् | | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) पित्रा | – | ——— | ——— |
| (ख) यूयम् | – | ——— | ——— |

**प्रश्न–2** रेखाङ्कितपदयोः सन्धिविच्छेदं कृत्वा नाम लिखत— [½×4=2]

(क) सः पदातिरिव गच्छति।

(ख) शिवस्य नाम दिगम्बरः अस्ति।

**प्रश्न–3** धातुं प्रत्ययं च पृथक् कृत्वा लिखत— [½×4=2]

(क) नीत्वा

(ख) लिखन्

**प्रश्न-4** निर्देशानुसारेण वाच्य परिवर्तनं कुरुत— [1×2=2]

(क) मया सूर्यः दृश्यते। (कर्तृवाच्ये)

(ख) सः पाठं पठति। (कर्मवाच्ये)

**प्रश्न-5** अधोलिखितानां पदानां लकारः पुरुषः च लिखत— [½×6=3]

(क) आगच्छतु

(ख) करिष्यामि

(ग) वर्तध्वे

**प्रश्न-6** रेखाङ्कितपदानां समासविग्रहं कृत्वा नाम लिखत— [½×6=3]

(क) <u>पापमुक्तः</u> भूत्वा कार्यं कुरु।

(ख) मोहनः <u>चक्रपाणिः</u> अस्ति।

(ग) <u>पितरौ</u> हट्टं गच्छतः।

**प्रश्न-7** अधोलिखितानि वाक्यानि शुद्धं कृत्वा लिखत— [1×3=3]

(क) श्यामा <u>विद्यालयस्य</u> बहिः गच्छति।

(ख) <u>ग्रामस्य</u> समया नदी प्रवहति।

(ग) श्री <u>गणेशं</u> नमः।

**प्रश्न-8** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण उत्तराणि लिखत— [1×3=3]

बिलासा शैशवकाले बाला बालैः सह क्रीडति स्म। तस्यै बालकानां क्रीडनकं क्रीडनं च रोचते स्म। बिलासा अदम्य साहसिका आसीत्। एकदा सुप्तं बालं नीत्वा वृक्कः पलायनं कुर्वन् आसीत्। तदा बिलासा वृक्कं दण्डेन ताडयित्वा बालकं मुक्तं कृत्वा मातरं समर्पयत्। बालकैः सह बिलासा मल्ल-कौशलं शिक्षते स्म।

***प्रश्नाः***

(क) बिलासा शैशवकाले केन सह क्रीडति स्म?

(ख) 'हिम्मतवाली' इति पदस्य कृते गद्यांशे किं पदमस्ति?

(ग) "एकदा सुप्तं बालं नीत्वा वृक्कः पलायनं कुर्वन् आसीत्।" इति वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

**प्रश्न-9** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण उत्तराणि लिखत— [1×3=3]

स्वामी विवेकानन्दः रायपुरे द्विवर्षपर्यन्तं समयं व्यतीतवान्। येन इदं नगरं परिपूतमभवत्। स्वामी विवेकानन्द-जन्मशताब्दी-वर्षे भव्यं स्मारकं निर्मातुं सः आत्मानन्दः प्राणपणेनायतत्। अयम् आश्रमः आध्यात्मिकदर्शनस्य केन्द्रमस्ति। आश्रमैव 'पाली क्लिनिक' इति औषधालयः ग्रन्थालयः च स्थापितः।

*प्रश्नाः*

(क) "स्वामी विवेकानन्दः रायपुरे द्विवर्षपर्यन्तं समयं व्यतीतवान्।" इति वाक्यस्य कर्तृपदं लिखत।

(ख) "अयम् आश्रमः आध्यात्मिकदर्शनस्य केन्द्रमस्ति।" इति वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ग) आश्रमैव के स्थापितः ?

**प्रश्न-10** अधोलिखितं श्लोकं पठित्वा निर्देशानुसारेण उत्तराणि लिखत— [1×3=3]

अज्ञानेनावृत्तो लोकस्तमसा न प्रकाशते।<br>
लोभात् त्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति॥

*प्रश्नाः*

(क) केन आवृत्तः लोकः ?

(ख) कस्मात् मित्राणि त्यजति ?

(ग) "सङ्गात्स्वर्गं न गच्छति।" इति वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

**प्रश्न-11** अधोलिखितं श्लोकं पठित्वा निर्देशानुसारेण उत्तराणि लिखत— [1×3=3]

पापान्निवारयति योजयते हिताय,<br>
गुह्यं निगूहति गुणान् प्रकटीकरोति।<br>
आपद्गतं च न जहाति ददाति काले,<br>
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥

*प्रश्नाः*

(क) कः पापात् निवारयति ?

(ख) सन्मित्रः आपद्गतं कं न जहाति ?

(ग) "सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।" इति वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

**प्रश्न-12** स्वपाठ्यपुस्तकात् चत्वारः सूक्तयः लिखत ये अस्मिन् प्रश्नपत्रे न आगतवन्तः। [1×4=4]

**प्रश्न-13** (अ) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण उत्तराणि लिखत ( *कोऽपि 4* )— [1×4=4]

भारतवर्षः अस्माकं देशः। वयं सर्वे भारतीयाः। भारतवर्षस्य भूमिः भारतीयानां जननी। अस्यां मृत्तिकायां क्रीडित्वा, सुस्वादुजलं पीत्वा, स्वादिष्टम् अन्नं च खादित्वा वर्धामहे। अतः अस्माकं भारतभूमिः सुजला सुफला सस्य श्यामला चास्ति। अस्माकं देशे हिमालयादयः अनेके पर्वताः सन्ति। पर्वतेभ्यः गङ्गादयः नद्यः प्रवहन्ति। नदीनां तटेषु बहूनि तीर्थस्थलानि सन्ति। अतः सुष्ठु उच्यते—

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

***प्रश्ना:***

(क) "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।" इति पदस्य हिन्दी अनुवादं कुरुत।

(ख) भारतीयानां जननी का?

(ग) अस्माकं भारतभूमिः कीदृशी अस्ति?

(घ) "नदीनां तटेषु बहूनि तीर्थस्थलानि सन्ति।" इति वाक्यस्य क्रियापदं किम् अस्ति?

(ङ) 'अस्माकम्' इति पदस्य मूलशब्दं विभक्तिं च लिखत।

(च) 'माता' इति पदस्य समानार्थकं पदं किं प्रयुक्तम्?

(ब) भवती सुरेखा अस्ति। भवती शा. उ. मा. विद्यालयः धमधानगरे पठति। अतः अवकाशाय स्वप्राचार्यं प्रार्थनापत्रं लिखत। [1+2+1=4]

***अथवा***

भवान् कोरियानगरे स्थितः व्योमेशः। भवतः मित्रं प्रशान्तः जशपुरनगरे वसति। स्वविद्यालयस्य वर्णनं कुर्वन् स्वमित्रं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया लिखत— [½×8=4]

तत्रास्तु, कर्तुम्, कोरियानगरतः, प्रशान्त, सन्ति, शोभनम्, पाठयन्ति, क्रीडाक्षेत्रम्

स्थानम् ———

दिनाङ्कः : 25.12.2019

प्रिय मित्र ———!

नमस्ते!

अत्र कुशलं ———। भवतः पत्रं प्राप्तम्। अहम् अधुना स्वविद्यालयस्य वर्णनं ——— इच्छामि। मम विद्यालयः अतीव ——— अस्ति। मम विद्यालये विशालं

———, समृद्धा प्रयोगशाला, सुन्दरः पुस्तकालयः च ———। मम प्राचार्यः अतीव कर्मठः अनुशासन प्रियः चास्ति। अस्माकम् अध्यापकाः मनोयोगेन ———। सर्वे छात्राः अपि योग्याः सन्ति। विस्तरेण पुनः लेखिष्यामि।

तवमित्रम्

व्योमेशः

**प्रश्न-14** अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत (*कोऽपि 4*)— [1×4=4]

(क) शैशवकाले बिलासा केन सह क्रीडति स्म?

(ख) कस्य पिधानं करोति द्यौः?

(ग) तृणानां केन सह विरोधः अस्ति?

(घ) वृक्षाः केषां शोधकाः?

(ङ) "उपविश! पेयं पीत्वा गच्छ।" इति कः वदति?

**प्रश्न-15** अधोलिखितानां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत (*कोऽपि 4*)— [1×4=4]

(क) का ग्रामस्य सर्वेषु कार्यक्रमेषु अग्रसरासीत्?

(ख) तीरथगढप्रपातं कुत्र अस्ति?

(ग) रायपुरे विवेकानन्द विद्यापीठं कैः स्थापितम्?

(घ) वृक्षाः प्राणिनां कथं उपकुर्वन्ति?

(ङ) देवानां माता अदितिः किं करोति?

**प्रश्न-16** स्वपाठ्यपुस्तकात् द्वौ सुभाषितश्लोकौ लिखत, यौ अस्मिन् प्रश्नपत्रे न आगतवन्तौ। [2½+2½=5]

***अथवा***

अधोलिखितानां मञ्जूषा-आधृत्य श्लोकं पूरयतु— [1×5=5]

मञ्जूषा—हसिष्यति, हन्त, गज,, भविष्यति, कोशगते

रात्रिर्गमिष्यति ——— सुप्रभातम्,
भास्वानुदेष्यति ——— पंकजश्रीः।
इत्थं विचिन्तयति ——— द्विरेफे,
हा हन्त! ———! नलिनीं ——— उज्जहार॥

**प्रश्न-17** अधोलिखितेषु विषयेषु एकस्मिन् विषये द्वादशवाक्येषु निबंधरचनां कुरुत— [½×12=6]

(क) कोऽपि महापुरुषः।

(ख) मम प्रदेशः।

(ग) सदाचारः।

(घ) कालिदासः।

**प्रश्न-18** (अ) मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत— [1×5=5]

तत्र, इक्, वि, जलात्, शब्दशास्त्रं

(क) नीति + ——— = नैतिकः भवति।

(ख) यत्र धूमः ——— अग्निः।

(ग) 'वितरति' इति पदे ——— उपसर्गः अस्ति।

(घ) अनन्तपारं किल ——— स्वल्पं तथायुर्बहवश्च विघ्नाः।

(ङ) लोष्ठमवदत् मित्र! अहं ——— बिभेमि।

(ब) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(क) "एकदा सः पिपासया व्याकुलः।" इति वाक्ये अव्ययम् अस्ति—

(*i*) एकदा

(*ii*) सः

(*iii*) पिपासया

(*iv*) व्याकुलः

(ख) 'सच्चरित्रः' इति पदे सन्धिः अस्ति—

(*i*) विसर्ग

(*ii*) गुणस्वर

(*iii*) व्यञ्जन

(*iv*) स्वर

(ग) श्रृगालः मत्स्यं संस्थापितवान्—

(*i*) स्थाणौ

(*ii*) मार्गे

(*iii*) वने

(*iv*) गृहे

(घ) 'शत-साहस्री-संहिता' इति शब्दं प्रयुज्यते—

(*i*) रामायणाय

(*ii*) महाभारताय

(*iii*) गीतायै

(*iv*) भारताय

(ङ) 'त्रयोदशाधिकं शतम्' इति पदस्य संख्या अस्ति—

(*i*) 133

(*ii*) 123

(*iii*) 113

(*iv*) 143

(स) उचित संबंध योजयतु— [1×5=5]

| **खण्ड 'अ'** | **खण्ड 'ब'** |
|---|---|
| (क) कविना | (*i*) अधिकरणकारकम् |
| (ख) ग्रामम् अभितः मार्गाः | (*ii*) विवादाय |
| (ग) तेस्वविषयेषु प्रवीणाः सन्ति | (*iii*) एकवचनम् |
| (घ) खलस्य विद्या भवति | (*iv*) विशाखदत्तः |
| (ङ) मुद्राराक्षसम् | (*v*) द्वितीयाविभक्तिः |

..........